# Shri Nilakantha Stava

# શ્રીનીલકણ્ઠસ્તવઃ

## Document Information

Text title : Shri Nilakantha Stava 02 55

File name : nIlakaNThastavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-55

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીનીલકણ્ઠસ્તવઃ

નમો ભૂતનાથં નમો દેવદેવં
    નમઃ કાલકાલં નમો દિવ્યતેજઃ ।
નમઃ કાલભસ્મં નમઃ શાન્તશીલં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૧॥

સદા તીર્થસિદ્ધં સદા ભક્તરક્ષં
    સદા શૈવપૂજ્યં સદા શુભ્રભસ્મમ્ ।
સદા ધ્યાનયુક્તં સદા જ્ઞાનતલ્પં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૨॥

શ્મશાને શયાનં મહાસ્થાનવાસં
    શરીરં ગજાનાં સદા ચર્મવેષ્ટમ્ ।
પિશાચા(આદિનાથં)પશૂનાં પ્રતિષ્ઠં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૩॥

ફણીનાગકુણ્ઠે(કણ્ઠં)ભુજઙ્ગાદ્યનેકં(ઙ્ગભૂષં)
    ગલે રુણ્ડમાલં મહાવીરશૂરમ્ ।
કટિવ્યાઘ્રચર્માગ્ચિતાભસ્મલેપં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૪॥

શિરશ્શુદ્ધગઙ્ગં શિવાવામભાગં
    વિયદ્દીર્ઘકેશં સદા માં(સહોમં)ત્રિનેત્રમ્ ।
ફણીનાગકર્ણં સદાસ્ભાલચન્દ્રં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૫॥

કરે શૂલધારં મરા(મહા)કષ્ટનાશં
    સુરેશં પરેશં મહેશં જનેશમ્ ।
ધને ચારુ ઈશં(ધનેશસ્યમિત્રં)ધ્વજેશં ગિરીશં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૬॥

ઉદાસં સુદાસં સુકૈલાસવાસં
    ધરાનિર્ઝરે સંસ્થિતં હ્યાદિદેવમ્ ।
અજં હેમકલ્પદ્રુમં કલ્પસેવ્યં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૭॥

મુનીનાં વરેણ્યં ગુણં રૂપવર્ણં (?)
    દ્વિજા સમ્પઠન્તં (દ્વિજૈઃ સ્તૂયમાનં)શિવં વેદશાસ્ત્રૈઃ ।
અહો દીનવત્સં કૃપાલું શિવં હિ(તં)
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૮॥

સદા ભાવનાથં સદા સેવ્યમાનં
    સદા ભક્તિદેવં સદા પૂજ્યમાનમ્ ।
મહાતીર્થવાસં સદા સેવ્યમેકં
    ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૯॥

॥ ઇતિ શ્રીનીલકણ્ઠસ્તવઃ સમ્પૂર્ણઃ ॥

Proofread by Aruna Narayanan

*Shri Nilakantha Stava*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*